CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ अथातुरसन्यासविधिं व्याख्यास्यामः कर्मक्लेशापनोदनद्वारा सन्न्याधिकारसंपत्तये च ज्ञानेऽप्यसामान्येनाङ्गत्वाय
तत्संकल्पकरूपं प्रसाम्नायं षड्विंशब्राह्मणभोजनद्वारा विधास्यामि कामि चेति मंत्रेण वपनं कृत्वा आत्मन्याधा
सन्नारोप्याग्नीन्काम्याग्निहोत्रादीनुत्सृज्य येऽप्यातुरसन्यासमहं करिष्यामि संकल्प्य व्याहृतौ सावित्रीं प्रवे
शयामीति संकल्प्य ॐ भूः तत्सवितुर्वरेण्यं व्याहृतौ सावित्रीमवेक्षयामि ॐ भुवः भर्गो देवस्य धीमहि व्याहृतौ
सावित्रीं प्र० ॐ सुवः धियो योनः प्रचोदयात् व्याहृतौ सावित्रीं ॐ भूर्भुवः सुवः तत्सवितुर्वरेण्यं व्याहृतौ सा
वित्रीं प्रण वेण्याहृतीः प्रवेक्षयामीति संकल्प्य ॐ भूः प्रण वेण्याहृतीं प्रवेक्षयामि ॐ भुवः प्रण वेण्याहृतीः प्र
ॐ सुवः प्रण वेण्या० प्र० ॐ भूर्भुवः सुवः प्रण वेण्या० प्र० ॥ अहं वक्षस्यदितिं कीर्तिं पुंसि गिरेर्दिवं पृथ्वीं
पतिं गोर्याजिनीवस्य मत्तमसि प्रविणसवर्चसं सुमेधा अमृतोक्षितः इति। त्रिशतो वेदानुवचनं। यन्मे
दुस्सामप्रभोषि अक्तुषः। क्षुधो ध्यमतांवृधा तमेमेधे यास्रणोतु। अमृतस्य देवधारणो भूया
सं शरीरमेधिचर्षणि। जिह्वामेमधुमत्तमा कर्णाभ्यां भूरि विश्रुवं ब्रह्मणः कोशोसि मेधया पिहि
तः। श्रुतंमेगोपाय। पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थितोहं स्वाहेति जपित्वा हो
ष्यन्पात्र्यां जलमादाय एकस्मिन्जलपात्रे द्वितीयपात्रस्थजलेन पाणिं जुहुयात्। अथवा अग्नेर्यो
र्यं प्राणः प्राणंगच्छ स्वाहेति प्रथमाहुतिः। आपो वैसर्वादेवताः सर्वाभ्योदेवताभ्यो जु
होमि स्वाहेति द्वितीयाहुतिः। पश्चात्सायंस्नानं कृत्वा पुनरपि आचम्य शिखामनुबध्नन्नमन्त्रेण

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जाया॰श्चविन्नेषणाया॰श्च लोकेषणाया॰श्च व्युत्थितोहं स्वाहेति पिबेत्॥ अभयं सर्वभूतेभ्यो मत्तः
स्वाहा॥ ॐ भूर्भुवःसुवरतिशिष्टं सकृज्जलं पिबेत्॥ अभयं सर्वभूतेभ्यो मत्तः स्वाहेति जलांज
लिक्षिपेत्॥ इदमेवाभयदानं॥ अथोर्ध्वं चातुरादिसोमित्युक्त्वा प्रेषानुच्चरेत्॥ ॐ भूः संन्यस्तं
मया॥ ॐ भुवः संन्यस्तं मया॥ ॐ सुवः संन्यस्तं मया॥ ॐ भूर्भुवःसुवः संन्यस्तं मया इति त्रिवारं
इममंत्रावृत्तिं चरेत्॥ ॐ भूर्भुवःसुवः संन्यस्तं मया स्वाहेति प्रतिदिशं जलांजलिं निक्षिपेत्॥ शिखा
यज्ञोपवीतं चांजलौ हित्वा भूः स्वाहेति भूमौ जलेवा क्षिपेत्॥ अक्तनकटिसूत्रादि सजेत्॥ प्रण
वेन काषायादि गृह्णीयात्॥ इदमेव त्रिदंडं॥ इदमेव ज्ञानशिखा चेति मंत्रेण यज्ञोपवीतं
परस्मै नामित्रशिष्यमभिप्रोक्ष्य रहस्यप्रणवसुपदिश्य अथातः परमहंसपरिव्राजका
नामिसामुपदिशेत्॥ व्रतप्रतानुसंधानं च कारयेत्॥ अतऊर्ध्वं सर्वं प्रणवेन कारयेत्॥
इत्यातुरसंन्यासविधिः॥ सं १८५८ अधिकज्येष्ठशुद्ध ४ भानुवासरे तद्दिने समाप्तं॥ छ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi